67

म१ : ४१४
तु७३
९५१

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव देवे
[हिरण्यकेशी ब्राह्मणाकरितां]
लेखक

(हिरण्यकेशीब्राह्मणांकरितां)

# ॥ अथदेवेप्रारंभः ॥

९५१

दे श्रीगणेशायनमः ॥ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं ॥ कविं वे.

१ सम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः ॥ १ ॥ ममत्तुनःपरि ज्मावसर्हा

ममत्तुवातोअपांवृषण्वान् ॥ शिशीतमिंद्रापर्वतायुवंनस्तन्नोविश्वेवरिवस्यंतुदे-

वाः ॥ २ ॥ सबुध्न्यादाष्टजनुषाभ्यग्रंबृहस्पतिर्देवतायस्यसम्राट् ॥ बुध्नाद्योअग्रम

भ्यर्त्योजसाबृहस्पतिमाविवासंतिदेवाः ॥ ३ ॥ वायुस्ताँ अग्नेप्रमुमोकुदेवः प्रजा

पतिःप्रजयासंविदानः ॥ प्रमुंचमानाभुवनस्यरेतोगातुंधत्तयजमानायदेवाः ॥ ४ १

॥ जातवेदोवपयागच्छदेवान्त्वंहिहोताप्रथमोबभूथ ॥ घृतेनत्वंतन्वोवर्धयस्व

स्वाहाकृतꣳहविरदंतुदेवाः ॥ ५ ॥ शतंवर्चिनःसहस्रंचसाकꣳहथोअप्रत्यसु
रस्यवीरान् ॥ उतमातामहिषमन्ववेनदमीत्वाजहतिपुत्रदेवाः ॥ ६ ॥ यज्ञेनयज्ञ
मयजंतदेवाःस्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतेयत्रपूर्वे
साध्याःसंतिदेवाः ॥ ७ ॥ बृहस्पतेसवितर्बोधयैनꣳसꣳशितंचित्संतराꣳसꣳशिं
शाधि ॥ वर्धयैनंमहतेसौभगायविश्वएनमनुमदंतुदेवाः ॥ ८ ॥ यईशेअस्यद्विप
दश्चतुष्पदःकस्मैदेवायहविषाविधेम ॥ यआत्मदाबलदायस्यविश्वउपासतेप्र-
शिषंयस्यदेवाः ॥ ९ ॥ येसहाꣳसिसहसासहंतेरेजतेअग्नेपृथिवीमखेभ्यः ॥ विश्वे

दे देवाविश्वैदेवाः ॥ १० ॥ अपामीतिंदुर्मतिंबाधमानारायस्पोषैयज्ञपतिमाभजंती वे.
२ रूवर्धीह्रियजमानायपोषमश्विनाध्वर्यूसादयतामिहत्वा ॥ अग्नेः पुरीषमसिदे
वयानीतांत्वाविश्वैअभिगृणंतुदेवाः ॥ ११ ॥ मर्माणितेवर्मभिश्छादयामिसोम-
स्त्वाराजामृतेनाभिवस्तां ॥ उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः ॥
१२ ॥ प्रजापतेः स्तपसावावृधानः सद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृतेनहविषा
पुरोगायाहिसाध्याहविरदंतुदेवाः ॥ १३ ॥ तत्वग्रहाणांग्रहत्वं ॥ देवतावाएताय २
जेमानस्यगृहेगृह्यंते ॥ यतग्रहाः ॥ विदुरैनंदेवाः ॥ १४ ॥ तदिष्टीनामिष्टित्वं ॥

एष्टयोहवैनाम ॥ ताइष्टय इत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ १५ ॥ दश
हूतोहवैनामैषः ॥ तंवाएतंदशहूतं संतं ॥ दशहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रि
याइवहिदेवाः ॥ १६ ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतं सप्तहूतं संतं ॥ सप्तहोते
त्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ १७ ॥ षड्ढूतोहवैनामैषः ॥ तंवाए
तं षड्ढूतं संतं ॥ षड्ढोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ १८ ॥
पंचहूतोहवैनामैषः ॥ तंवाएतंपंचहूतं संतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥
परोक्षप्रियाइवहिदेवाः ॥ १९ ॥ चतुर्हूतोहवैनामैषः ॥ तंवाएतंचतुर्हूतं संतं ॥ च

दे तुर्हूर्तेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ २० ॥ आशिक्षंतोनशैकि वे.
३ म ॥ मेदस्वतायजमानाः ॥ स्रुचाज्यैनजुह्वतः ॥ अकामावोविश्वेदेवाः ॥ २१ ॥ नहि
स्पशमविदंनन्यमस्मात् ॥ वैश्वानरात्पुरएतारमग्नेः ॥ अथैममथंनमृतममूराः
वैश्वानरंक्षैत्रजित्यायदेवाः ॥ २२ ॥ उपतेगाइवाकरं ॥ वृणीष्वदुहितर्दिवः ॥ रा-
त्रीस्तोमंनजिग्युषी ॥ देवींवाचमजनयंतदेवाः ॥ २३ ॥ सहिवेदयथाहविः ॥ शिवा
अस्मभ्यमोषधीः ॥ कृणोतुविश्वचर्षणिः ॥ भद्रांनःश्रेयःसमनैष्टदेवाः ॥ २४ ॥
अयंयज्ञोवर्धतांगोभिरश्वैः ॥ इयंवेदिःस्वपत्यासुवीरा ॥ इदंबर्हिरतिबर्हींष्य

न्या॥ इमंयज्ञंविश्वेअवंतुदेवाः॥२५॥ देवंदेवायजागृवि॥ कामिहेकाः कइमेपतं-
गाः॥ मांथालाः कुलिपरिमापतंति॥ अनाहृतैनान्प्रधमंतुदेवाः॥२६॥ स्तोमैसप्त
दशेस्तुतं॥ वैरूपेणविशौजसा॥ हविरिंद्रेवयोदधुः॥ शारदेनर्तुनादेवाः॥२७॥
एकविंशऋभवःस्तुतं॥ वैराजेनः श्रियाश्रियं॥ हविरिंद्रेवयोदधुः॥ हेमंतेनर्तु
नादेवाः॥२८॥ मरुतस्त्रिणवेस्तुतं॥ बलेनशक्करीः सहः॥ हविरिंद्रेवयोदधुः॥
शैशिरेणर्तुनादेवाः॥२९॥ आदित्यान्काममवसेहुवेम॥ येभूतानिजनयंतोवि
चिरव्युः॥ सीदंतुपुत्राअदितेरुपस्थं॥ स्तीर्णंबर्हिर्हविरद्यायदेवाः॥३०॥ आर्द्र

दे ब्रह्मणागीर्भिर्विप्रैः ॥ ब्रह्मणस्पतेत्वमस्ययंता ॥ सूक्तस्यबोधितनयंचजिन्व ॥ वि वे.
४ श्वंतत्भद्रंयदवंतिदेवाः ॥ ३१ ॥ नराशꣳसोग्नास्पतिर्नोअव्यात् ॥ आयेवामस्यसं
गथेरयीणां ॥ प्रियादेवस्यसवितुःस्याम ॥ आनोविश्वेअस्क्रागमंतुदेवाः ॥ ३२ ॥
शर्मभिषाचः शर्सुरातिषाचः ॥ शंनोदिव्याः पार्थिवाः शंनोअप्याः ॥ येसवितुःस
त्यसवस्यविश्वे ॥ मित्रस्यव्रतेवरुणस्यदेवाः ॥ ३३ ॥ याश्वैवैशंतीरुतप्रासचीर्याः
॥ यासामषाढामधुभक्षयंति ॥ तानआपश्चाꣳस्योनाभवंतु ॥ तन्नोविश्वेउपशृ ४
ण्वंतुदेवाः ॥ ३४ ॥ तौदेवेभ्यः कृणुतोदीर्घमायुः ॥ शतꣳसहस्राभेषजानिध-

त्तः ॥ यज्ञंनोराजावरुणाउपयातु ॥ तंन्नोविश्वेअभिसंयंतुदेवाः ॥ ३५ ॥ श्रेष्ठोदे
नामुतमानुषाणां ॥ तंब्राह्मणाःसोमपाः सोम्यासः ॥ प्रोष्ठपदासोअभिरक्षंति
सर्वे ॥ चत्वारएकमभिकर्मदेवाः ॥ ३६ ॥ लोकस्यराजामहतोमहान्हि ॥ सुगं
नः पंथामभयंकृणोतु ॥ यस्मिन्नक्षत्रेयमएतिराजा ॥ यस्मिन्नेनमभ्यषिंचंत
देवाः ॥ ३७ ॥ यथादेवतमेवप्रसौति ॥ दैव्यस्यचमानुषस्यचव्यावृत्त्यै ॥ त्रिराह
॥ त्रिषत्याहिदेवाः ॥ ३८ ॥ यएवदेवानाँ हविष्कृतः ॥ तान्व्ह्वयति ॥ त्रिर्व्ह्वयति
॥ त्रिषत्याहिदेवाः ॥ ३९ ॥ तत्ब्रह्महणंनात्यच्यवत ॥ अंतर्वेदिनिनयत्यवरु

दे ध्यै॥उल्मुकेनाभिगृण्हातिशृतत्वाये॥शृतकामाइवहिदेवाः॥४०॥तेषांतद्भा वे.
५ गधेयं॥तानेवतेनप्रीणाति॥वैश्वदेव्यर्चा॥एतेहिविश्वेदेवाः॥४१॥सद्योजा
तोव्यमिमीतयज्ञं॥अग्निर्देवानामभवत्पुरोगाः॥अस्यहोतुःप्रदिश्यृतस्यवाचि
॥स्वाहाकृतꣳहविरदंतुदेवाः॥४२॥आत्मन्वान्त्सौमघृतवान्हिभूत्वा॥देवान्गं
च्छसुवर्विंदयजमानायमह्यं॥इराभूतिःपृथिव्यैरसोमोत्क्रमीत्॥देवाःपितरः
पितरोदेवाः॥४३॥यज्ञियायज्ञंविचयंतिशंच॥ओषधीरापइहशक्वरीश्च॥यो ५
माहृदामनसायश्चवाचा॥योब्रह्मणाकर्मणाद्वेष्टिदेवाः॥४४॥विच्छिन्नद्मिवि

धृतीभ्याꣳसपत्नान् ॥ जातान्भ्रातृव्यान्येचजनिष्यमाणाः ॥ विशोयंत्राभ्यां
विधर्मांस्येनान् ॥ अहꣳस्थानामुत्तमोसानिदेवाः ॥ ४५ ॥ उषाश्चेतस्मैनिम्रु-
क्ष ॥ सर्वंपापꣳसमूहतां ॥ योनःसपत्नोयोरणः ॥ मर्तोभिदासतिदेवाः ॥ ४६ ॥
अन्नंविराट् ॥ विराजैवान्नाद्यमवरुंधे ॥ त्रेधाविभज्यदेवतांजुहोति ॥ त्र्यावृ-
तोवैदेवाः ॥ ४७ ॥ अस्मिन्नेवतल्लोकेकामान्दधाति ॥ तस्मादस्मिन्लोकेबह
वःकामाः ॥ त्रयाणांत्रेयाणाꣳसहवपाजुहोति ॥ त्र्यावृतोवैदेवाः ॥ ४८ ॥ रा
जोमहिमा ॥ यद्रूपांमहिम्नोभयतःपरियजति ॥ यजमानमेवराज्येनोभयतः

दे परिगृण्हाति॥पुरस्तास्त्वाहाकारावाअन्येदेवाः॥४९॥एतद्वैतद्देवाएतांदेवतां वे.
६ ॥पशुंभूतंमेधायालभंत॥यज्ञमेव॥यज्ञेनयज्ञमयजंतदेवाः॥५०॥तेनमेत
प॥तेनमेज्वल॥तेनमेदीदिहि॥यावद्देवाः॥५१॥वासोददाति॥तेनायुःप्रति
रते॥वेदितृतीयेयजेत॥त्रिषत्याहिदेवाः॥५२॥कृशानुर्विश्वावसुः॥मूर्ध
न्वान्त्सूर्यवर्चाः॥कृतिरित्येकादशगंधर्वगणाः॥देवाश्चमहादेवाः॥५३॥ए
वाहिवायो॥एवाहींद्र॥एवाहिपूषन्॥एवाहिदेवाः॥५४॥भुवनंदेवसूवरीः ६
॥आदित्यानदितिंदेवीं॥योनिनोर्ध्वमुदीषत॥भद्रंकर्णेभिःश्रुणुयामदेवाः

५५ ॥ उषाश्चतस्मैनिम्रुच्च सर्वपापं समूहतां ॥ योनःसपत्नोयोरणोमर्तोऽभि
दासतिदेवाः ॥ ५६ ॥ ऋतस्यपदेकवयोनिपांति ॥ अंतःप्रविष्टंकर्तारमेतं ॥ अं
तश्चंद्रमसिमनसाचरंतं ॥ सहैवसंतंनविजानंतिदेवाः ॥ ५७ ॥ शक्रःप्रविद्वान्
प्रदिशःश्चतस्रः ॥ तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाअयनायविद्यते ॥
यज्ञेनयज्ञमयजंतदेवाः ॥ ५८ ॥ ॐ राजाधिराजायप्रसह्यसाहिने ॥ नमोवयं
वैश्रवणायकुर्महे ॥ समेकामान्कामकामायमह्यं ॥ कामेश्वरोवैश्रवणोददातु ॥
कुबेरायवैश्रवणाय ॥ महाराजायनमः ॥ ॐ स्वस्ति ॥ साम्राज्यंभोज्यंस्वारा

दे ज्यं॥वैराज्यंपारमेष्ठ्यंराज्यंमहाराज्यमाधिपत्यमयंसमंतपर्याईस्यात्सार्वभौमः वे.
७ सार्वायुषआंतादापरार्धात्॥पृथिव्यैसमुद्रपर्यंतायाएकराळिति॥तदप्येषः
श्लोकोभिगीतोमरुतःपरिवेष्टारोमरुत्तस्यावसन्गृहे॥आविक्षितस्यकाम-
प्रेर्विश्वेदेवाःसभासदइति॥विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउत
विश्वतःस्यात्॥संबाहुभ्यांनमतिसंपतत्रैर्द्यावापृथिवीजनयंदेवएकः॥योवै
तांब्रह्मणोवेद॥अमृतेनावृतांपुरीं॥तस्मैब्रह्मचब्रह्माच॥आयुःकीर्तिंप्रजांददुः
॥इतिदेवेसमाप्तं॥ ॥अथगायत्री॥ ॥पुरुषस्यविद्मसहस्राक्षस्य- ७
महादेवस्यधीमहि॥तन्नोरुद्रःप्रचोदयात्॥१॥तत्पुरुषायविद्महेमहादेवा

यधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥ २ ॥ तत्पुरुषायविद्महेवक्रतुंडायधीमहि
॥ तन्नोदंतिः प्रचोदयात् ॥ ३ ॥ तत्पुरुषायविद्महेचक्रतुंडायधीमहि ॥ तन्नोनं-
दिः प्रचोदयात् ॥ ४ ॥ तत्पुरुषायविद्महेमहासेनायधीमहि ॥ तन्नः षण्मुखः
प्रचोदयात् ॥ ५ ॥ तत्पुरुषायविद्महेस्रुवर्णपक्षायधीमहि ॥ तन्नोगरुडः प्रचो
दयात् ॥ ६ ॥ वेदात्मनायविद्महेहिरण्यगर्भायधीमहि ॥ तन्नोब्रह्मप्रचोदया-
त् ॥ ७ ॥ नारायणायविद्महेवासुदेवायधीमहि ॥ तन्नोविष्णुः प्रचोदयात् ॥ ८
वज्रनखायविद्महेतीक्ष्णदंष्ट्रायधीमहि ॥ तन्नोनारसिंहः प्रचोदयात् ॥ ९ ॥

भास्करायविद्महेमहद्द्युतिकरायधीमहि॥तन्नोआदित्यःप्रचोदयात्॥१०॥वैश्वा
नरायविद्महेलालीलायधीमहि॥तन्नोअग्निःप्रचोदयात्॥११॥कात्यायनाय
विद्महेकन्यकुमारिधीमहि॥तन्नोदुर्गिःप्रचोदयात्॥१२॥ ॥इतिगायत्री॥
श्रीमहाविष्णुप्रमुखपंचायतनदेवताभ्योनमः॥ मंत्रपुष्पांजलिंसमर्पयामि॥

पुणें पेठ सदाशिव येथें नारो आपाजी गोडबोले यांणीं आपले वृत्तप्रसारक छाप-
खान्यांत छापिलें. तारीख २८ नवंबर सन १८७६ इ० आवृत्ति पहिली किंमत ६३



८५१

॥ इति ढेवेसमाप्त ॥